# आदर्शप्रश्नपत्रम् (गीताप्रवेशः - उत्तरभागः)

1. लघूत्तरीयाः प्रश्नाः -

   क. एषु शब्देषु धातुं प्रत्ययं च सूचयन्तु-
   प्रापकः, अर्चकः, लब्धा, श्रवणम्, दातृ|
   
   ख. सन्-प्रत्ययस्य प्रयोगः कस्मिन् अर्थे भवति?
   
   ग. कारकाणि कति सन्ति, कानि च तानि?

2. वैकल्पिकप्रश्नाः

   उपदेष्टुम् इच्छुः
   
   क. उपदिशामि ख. उपदिदिक्षामि
   
   ग. उपदेष्टा घ. उपदिदिक्षुः

3. अधस्तनवाक्येषु शानच्-प्रत्ययान्तप्रयोगः करणीयः -
   
   सः फलम् आनयति|
   
   देशभक्ताः कष्टानि सहन्ते|

4. आधारस्य त्रीन् भेदान् सोदाहरणं बोधयन्तु-

5. सौभद्रः, पार्थः, द्रौपदेयः, पाण्डवः - एतेषु का समानता अस्ति?

6. अत्र प्रदत्तानां शब्दानाम् अर्थान् लिखन्तु-
   
   आदित्यम्, देही, दौर्बल्यम्, तावकाः|

7. अधस्तनश्लोकस्य अन्वयरचनां कुर्वन्तु-
   
   मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः|<br>
   सर्वारम्भपरित्यागी गुणातीतः स उच्यते||